# ॥ उच्छिष्टगणेशस्तवराजः ॥

देव्युवाच -

पूजान्ते ह्यनया स्तुत्या स्तुवीत गणनायकम् ॥

नमामि देवं सकलार्थदं तं सुवर्णवर्णं भुजगोपवीतिनम् ।
गजाननं भास्करमेकदन्तं लम्बोदरं रक्तविशेषकान्तिम् ॥ १ ॥
केयूरिणं हारकिरीटजुष्टं चतुर्भुजं पाशवराभयानि ।
सृणिं च हस्तं गणपं त्रिनेत्रं सचामर-स्त्रीयुगलेन युक्तम् ॥ २ ॥
षडक्षरात्मानमनल्पभूषं मुनीश्वरैः भार्गवपूर्वकैश्च ।
संसेवितं देवमनाथकल्पं रूपं मनोज्ञं शरणं प्रपद्ये ॥ ३ ॥
वेदान्तवेद्यं जगतामधीशं देवादिवन्द्यं सुकृतैकगम्यम् ।
स्तम्बेरमास्यं ननु चन्द्रचूडं विनायकं तं शरणं प्रपद्ये ॥ ४ ॥
भवाख्यदावानलदह्यमानं भक्तं स्वकीयं परिषिञ्चते यः ।
गण्डस्रुताम्भोभिरनन्यतुल्यं वन्दे गणेशं च तमोऽरिनेत्रम् ॥ ५ ॥
शिवस्य मौलाववलोक्य चन्द्रं सुशुण्डया मुग्धतया स्वकीयम् ।
भग्नं विषाणं परिभाव्य चित्ते आकृष्टचन्द्रो गणपोऽवतान्नः ॥ ६ ॥
पितुर्जटाजूटतटे सदैव भागीरथी तत्र कुतूहलेन ।
विहर्तुकामः स महीध्रपुत्र्या निवारितः पातु सदा गजास्यः ॥ ७ ॥

लम्बोदरो देवकुमारसङ्घैः क्रीडन्कुमारं जितवान्निजेन ।
करेण चोत्तोल्य ननर्त रम्यं दन्तावलास्यो भयतः स पायात् ॥ ८ ॥
आगत्य योच्चैर्हरिनाभिपद्मं ददर्श तत्राशु करेण तच्च ।
उद्धर्तुमिच्छन्विधिवादवाक्यं मुमोच भूत्वा चतुरो गणेशः ॥ ९ ॥
निरन्तरं संस्कृतदानपट्टे लग्नां तु गुञ्जद्भ्रमरावलीं वै ।
तं श्रोत्रतालैरपसारयन्तं स्मरेद्गजास्यं निजहृत्सरोजे ॥ १० ॥
विश्वेशमौलिस्थितजह्नुकन्या जलं गृहीत्वा निजपुष्करेण ।
हरं सलीलं पितरं स्वकीयं प्रपूजयन्हस्तिमुखः स पायात् ॥ ११ ॥
स्तम्बेरमास्यं घुसृणाङ्गरागं सिन्दूरपूरारुणकान्तकुम्भम् ।
कुचन्दनाश्लिष्टकरं गणेशं ध्यायेत् स्वचित्ते सकलेष्टदं तम् ॥ १२ ॥
स भीष्ममातुर्निजपुष्करेण जलं समादाय कुचौ स्वमातुः ।
प्रक्षालयामास षडास्यपीतौ स्वार्थं मुदेऽसौ कलभाननोऽस्तु ॥ १३ ॥
सिञ्चाम नागं शिशुभावमाप्तं केनापि सत्कारणतो धरित्र्याम् ।
वक्तारमाद्यं नियमादिकानां लोकैकवन्द्यं प्रणमामि विघ्नम् ॥ १४ ॥
आलिङ्गितं चारुरुचा मृगाक्ष्या सम्भोगलोलं मदविह्वलाङ्गम् ।
विघ्नौघविध्वंसनसक्तमेकं नमामि कान्तं द्विरदाननं तम् ॥ १५ ॥
हेरम्ब उद्यद्रविकोटिकान्तः पञ्चाननेनापि विचुम्बितास्यः ।
मुनीन् सुरान् भक्तजनांश्च सर्वान् स पातु रथ्यासु सदा गजास्यः ॥ १६ ॥
द्वैपायनोक्तानि स निश्चयेन स्वदन्तकोट्या निखिलं लिखित्वा ।

दन्तं पुराणं शुभमिन्दुमौलिस्तपोभिरुग्रं मनसा स्मरामि ॥ १७ ॥

क्रीडातटान्ते जलधाविभास्ये वेलाजले लम्बपतिः प्रभीतः ।

विचिन्त्य कस्येति सुरास्तदा तं विश्वेश्वरं वाग्भिरभिष्टुवन्ति ॥ १८ ॥

वाचां निमित्तं स निमित्तमाद्यं पदं त्रिलोक्यामददत्स्तुतीनाम् ।

सर्वैश्च वन्द्यं न च तस्य वन्द्यः स्थाणोः परं रूपमसौ स पायात् ॥ १९ ॥

इमां स्तुतिं यः पठतीह भक्त्या समाहितप्रीतिरतीव शुद्धः ।

संसेव्यते चेन्दिरया नितान्तं दारिद्र्यसङ्घं स विदारयेन्नः ॥ २० ॥

॥ इति श्रीरुद्रयामलतन्त्रे गौरीशङ्कर संवादे उच्छिष्टगणेशस्तोत्रं समाप्तम् ॥

Sri Ucchishta Ganesha Stavaraja was revealed by Sri Parashakti ti her consort Sri Mahadeva in Rudrayamala Tantra. This is the royal hymn of Sri Ucchishta Mahaganapati, that celebrates the playful form of the Lord who is the adhiShThAtA for the six and nine lettered Mahamantras, brining joy to the readers of this sacred hymn. This hymn should be recited by Upasakas of this form of Ganesha, after performing the Panchavarana Puja on the night of Krishna Chaturthi.

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]